**दिनाङ्क :-01.02.2025** **प्रात: - 06:55**

**इयम् आकाशवाणी**

**सम्प्रति वार्ता: श्रूयन्ताम्**

**प्रवाचिका – निधि: तिवारी**

-

**अथ वार्ता:**

**अर्थ-सङ्कल्पनापत्रम्**

वित्तमन्त्री निर्मलासीतारामन् इत्येषा अद्य लोकसभायां पञ्चविंशत्यधिक-द्विसहस्र-षड्विंशत्यधिक-द्विसहस्रतमवर्षयो: अर्थ-सङ्कल्पना-पत्रं प्रस्तोष्यति। इदं हि नरेन्द्रमोदि-प्रशासनस्य तृतीय-कार्यकालस्य द्वितीयम् अर्थ-सङ्कल्पना-पत्रं भविष्यतीति । अस्मात् पत्रप्रस्तुतिकरणात् पूर्वं ह्य: संसद: उभयो: सदनयो: आर्थिक-सर्वेक्षणं प्रस्तुतम्। यस्मिन् अर्थव्यवस्थाया: प्रदर्शनानि अवलोकितानि । नवदशाधिक द्विसहस्रतमे वर्षे पदभारग्रहणानन्तरं वित्तमन्त्रिण: निर्मलासीतारामन् इत्येतस्या: इदं हि सततम् अष्टमम् अर्थ- सङ्कल्पना-पत्रं भविष्यति। लोकसभायां पत्रस्य प्रस्तुते: अनन्तरम् अर्थ-पत्रस्यास्य एका प्रति: राज्यसभायामपि प्रस्तोष्यते । आय-व्ययपत्रात् पूर्वं एकस्मिन् परामर्शोपवेशनावधौ वित्तमन्त्रिणा कृषकसङ्घै: कृषि-अर्थशास्त्रिभि: उच्च क्षेत्राणां प्रतिनिधिभि: हितधारकैश्च सह उपवेशनानि विहितानि । अस्य अर्थ- सङ्कल्पना-पत्रस्य प्रथम: भाग: फरवरीमासस्य त्रयोदश दिनाङ्कपर्यन्तम् अथ च द्वितीय: भाग: मार्चमासे दशदिनाङ्कत: अप्रैलमासस्य चतुर्थदिनाङ्कं यावत् प्रचलिष्यति ।

**महाकुम्भ: - उपराष्ट्रपति:**

उपराष्ट्रपति: जगदीपधनखड: अद्य प्रयागराजं महाकुम्भं प्रति यास्यति । तत्रासौ सङ्गमे आस्थावगाहनं करिष्यति । अस्माकं वार्ताहर: सूचितवान् यत् दिव्य: भव्य: च महाकुम्भ: वैश्विकध्यानम् आकर्षयति । विविधदेशानां राजनयिकाभियानानां प्रमुखा: अपि अद्य महाकुम्भं प्रति आयान्ति । अस्य वर्षस्य महाकुम्भेन भारतस्य बृहत्तमस्य अनुष्ठानस्य रूपेण स्वस्थानं प्रतिष्ठितम् । प्रथमवारं त्रिसप्तति-देशानां राजनीतिज्ञा: अद्य गङ्गा-यमुना-सरस्वती-नदीनां पुण्ये पवित्रे च सङ्गमे पुण्यावगाहनाय प्रयागराजं प्रति आगच्छन्ति । एते जना: अक्षयवटं बड़े-हनुमान-मन्दिरं चापि प्रति दर्शनार्थं गमिष्यन्ति । तदनु डिजिटल- महाकुम्भ-एक्सपीरियंस-इत्येतस्मिन् स्थापिते केन्द्रे आधुनिकप्रणाल्या: माध्यमेन महाकुम्भस्य माहात्म्यम् अवलोकयिष्यन्ति ।

**नवदिल्ली- पुस्तकमेलकम्**

नवदिल्ल्या: भारतमण्डपे अद्य आरभ्य नवदिल्ली- विश्व- पुस्तक- मेलकं समारप्स्यते। अस्मिन् वर्षे मेलकस्य शीर्षको विद्यते- **वयं भारतस्य जना: -भारतस्य गणतन्त्रस्य पञ्चसप्ततिवर्षाणाम् उत्सव: इति**। नवदिवसात्मकस्य अस्य मेलकस्य उद्घाटनं राष्ट्रपतिना द्रौपदी- मुर्मुइत्यनया विधास्यते। आकाशवाण्या सह वार्तालापं कुर्वन् राष्ट्रिय- पुस्तक- न्यासस्य निदेशक:

युवराजमलिकः सूचितवान् यत् अस्मिन वर्षे मेलकस्य अस्य प्रमुखः रूसदेशो विद्यते तथा च पञ्चाशदधिकं देशाः भागं भजिष्यन्ति एतस्मिन् मेलके भूयोऽपि द्वि- सहस्रं यावत् प्रकाशकाः एकसहस्रं यावच्च वक्तारः सम्मिलिताः भविष्यन्ति।

**फॉरेक्स-आरक्षणम्**

भारतीय-रिजर्व-बैंक-इत्यनेन प्राप्तस्य नवीनतमस्य दत्तांशस्य अनुसारं भारतस्य वैदेशिक-मुद्रा-सञ्चय: पञ्च दशमलव पञ्च सप्त बिलियन-डॉलर-मितात् नवविंशत्यधिकषड्शतं दशमलव पञ्च पञ्च-बिलियन-डॉलर-परिमितं यावत् जनवरीमासस्य अन्तिमे सप्ताहे संवर्धित: । वैदेशिक-मुद्रा-सम्पत्तौ महत्वपूर्ण:लाभ: जात: यो हि सञ्चयस्य प्रमुख: घटक: आसीत् ।

**क्रिकेटिति**

पुरूषाणां क्रिकेट्-क्रीडायां ह्य: रात्रौ पुणेनगरस्य महाराष्ट्र-क्रिकेट्-एसोसिएशन-क्रीडाङ्गणे चतुर्थे विंशतिप्रतिविंशति- इत्येतस्मिन् अन्ताराष्ट्रियद्वन्द्वे भारतेन इंग्लैण्डदलं पञ्चदश- धावनाङ्कै: पराजितम् ।

**इति वार्ता:**